PSBB LearningLeadership Academy
Bangalore-2021-22
Class:- VIII   Sub:- Sanskrit II Lang

**MID YEAR EXAMINATION**

**REVISION WORKSHEET**

---

**' अ ' भागः**

**( अनुप्रयुक्त- व्याकरणम् )**

---

**I.उचितैः शब्दरूपैः रिक्तस्थानानि पूरयत।**

1)------ अस्मान् रक्षति।( जगत् )
2)------ किं रोचते ? ( भवत् )
3) त्वम् ----- कार्यं कुरु। (इदम् )
4)------ पुष्पाणि सुन्दराणि सन्ति।( इदम् )
5)------ वेदव्यासाय नमः। ( विद्वस्)

**II.उचितैः लकाररूपैः रिक्तस्थानानि पूरयत।**

1) यूयं संस्कृते ------।(भाष् -वि.लिङ् )

2)अहं पारितोषिकं--------। (लभ्- लोट् )

3)भवत्यः विरामकाले--- । (मुद् - वि.लिङ् )

4)त्वं गुरुजनान् -----।( सेव्- लोट् )

5)विद्वांसः देवं ------।( वन्द् - वि .लिङ् )

**III.धातु-प्रत्ययानां संयोगं विभागं वा कुरुत।**

1)उप+ लभ् + ल्यप् 2)नेतुम् 3)आदाय

4)स्था + तुमुन् 5) परित्यज्य 6)चिन्तयित्वा

7) उत्+स्था+ल्यप् 8) जि +क्त्वा

9)पच् + क्त्वा 10) आगन्तुम् 11)ज्ञा+तुमुन्

12)आरुह्य

**IV.सन्धिं सन्धिविच्छेदं वा कुरुत।**

1)तद्व्यापरः 2) नमः + अस्तु

3) अजन्तः 4) बालः + हसति

5)तत् + अपि 6) शिवो वन्द्यः

7)तत् + इत्थम् 8) मनः + अस्ति

9)नरः + वदति 10) सिंहोऽपश्यत्

**IV.रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।**

**1)ब्राह्मण्याः, तस्मिन् नकुले विश्वासः नासीत्। ------**

**2)सर्पः नकुलं खण्डशः अकरोत्।**
**------**

**3)सा रुधिरेण लिप्तं नकुलम् अपश्यत्।**
**---------------**

**4)स्वामीविवेकानन्दः गुरुभक्तः आसीत्।**
**--------**

**5)नरेन्द्रस्य जननं सोमवासरे अभवत्।**
**---------**

**V.उचितैः अव्ययैः रिक्तस्थानानि पूरयत।** 1) त्वं ------- तस्मै धनम् अयच्छः?
2) कोपेन --------।
3)----- बहिः गमनं नोचितम्।
4)------ राजा ------ प्रजाः।
5)भवान् ------ प्रयत्नं कुरु।

**( नक्तम्, पुनः, यथा - तथा, अलम्, किमर्थम् )**

**VI.संस्कृते सङ्ख्यानां नामानि लिखत।**
क) 14 ख) 38 ग) 47 घ) 6

**VII.पर्यायपदं लिखत।**

---

**' आ ' विभागः**

**VIII.अधोदत्तं गद्यभागं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

8. भारते प्रतिषड्वर्षं प्रयागे कुम्भार्धकुम्भनामके महामेलके भवतः। एतयोः मेलकयोः सर्वस्मात् भारतात् जनाः अत्र आगच्छन्ति। तत्र महामेलके विभिन्नाः व्यवस्थाः यात्रिणां कृते क्रियन्ते। जनैः अपि ज्ञातव्यं यत् मेलकं गत्वा सुविधायाः अपेक्षा न करणीया। तत्र जनसम्मर्दनेन असुविधाः अपि सम्भवेयुः। जनः मेलामागत्य पूर्वं संगमे यथाकालं स्नानं कुर्यात्, ततः सत्यवसरे पटकुट्यां निवसेत्। मातरं पितरं भ्रातरमपि सहैव आनयेत्। सात्विकमाहारं खादेत्। मध्याह्ने मेलास्थितं हट्टं गच्छेत्, आपणेभ्यः आवश्यकं कालोचितं वस्तु क्रीणीयात्। ततः सायं साधूनां, विदुषां महात्मनां चोपदेशान् शृणुयात्, नाट्यमण्डलीनां मधुरां रासलीलां पश्येत् मन्दिरं वा गच्छेत्। ततः जनः ग्रामे नगरे वा बन्धुभ्यः मित्रेभ्यः परिचितेभ्यः च वितरणार्थं प्रसादम् अवश्यमानयेत्।
तस्यां मेलायां किमपि निषिद्धं कार्यं न करणीयम् यथा कोऽपि नद्यां वर्जितस्थाने न स्नातु, धूम्रपानादिकं न करोतु, अस्त्रादिकम् न निदधातु, आयुधं न रक्षतु, उच्चैः न वदतु, केनापि सह विवादं न करोतु। आवश्यके सति राजपुरुषाणां साहाय्यं सर्वः स्वीकरोतु।

**I. एकपदेन उत्तरत–**

(*i*) जनः महामेलके कुम्भे कुत्र निवसेत्?

(*ii*) मेलायां जनः किं न निदधातु?

**II. पूर्णवाक्येन उत्तरत–**

(*i*) जनैः किं ज्ञातव्यम्?

(*ii*) जनः महामेलकात् किमर्थं प्रसादम् आनयेत्?

**III. भाषिककार्यम्–**

(*i*) अनुच्छेदे 'व्यवस्थाः' इति विशेष्यस्य विशेषणं किं लिखितम्?

(*ii*) 'भोजनम्' इत्यस्य पदस्य कः पर्यायः अनुच्छेदे प्रयुक्तः?

(*iii*) 'जनः' इति कर्तृपदस्य क्रियापदं किम्?

**IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।**

9. ईस्वीवर्षस्य सप्तमशताब्द्यां महाराष्ट्रप्रान्ते आसीद् राजा विष्णुवर्धनः। तस्य राजसभायां महाकविः भारविः राजकविः आसीत्। तस्य महाकाव्यं किरातार्जुनीयं पुरा कालादेव अत्यन्तं प्रसिद्धं वर्तते। तद् अमरकाव्यम् अर्थगौरवात् संस्कृतसाहित्यस्य बृहत्त्रय्यां प्रथमं स्थानम् अलङ्करोति। भारविः बाल्यकाले महता परिश्रमेण विद्याम् अर्जितवान्। स नियमेन चतुरो वेदान् षट् शास्त्राणि चापठत्। तस्य विलक्षणा प्रतिभा काव्यरचनायामपि प्रवृत्ता। सः सर्वदा विद्वत्सभासु सोत्साहम् उपातिष्ठत्। तत्र पण्डितैः सह अनेकवारं चातुर्येण शास्त्रार्थम् अकरोत्। सः कविसम्मेलनेषु निरन्तरं काव्यम् अश्रावयत्। श्रोतारः तस्य रम्यं काव्यं श्रुत्वा भृशं प्रशंसन्ति स्म। इत्थं काव्यकलायां तस्य कीर्तिलता अल्पेनैव कालेन चतुर्दिक्षु प्रासरत्।

**I. एकपदेन उत्तरत–**

(*i*) कदा भारविः विद्याम् अर्जितवान्?

(*ii*) सप्तमशताब्द्यां महाराष्ट्रे कः राजा आसीत्?

**II. पूर्णवाक्येन उत्तरत–**

(*i*) किरातार्जुनीयम् महाकाव्यं कथं प्रथमं स्थानम् अलङ्करोति?

(*ii*) भारविः पण्डितैः सह किम् अकरोत्?

**III. भाषिककार्यम्–**

(*i*) 'अर्जितवान्' इति क्रियायाः अत्र कर्तृपदं किम्?

(*ii*) 'रम्यं काव्यम्' अनयोः पदयोः विशेषणपदं किम्?

(*iii*) 'मूढैः' इति पदस्य विपर्ययः अनुच्छेदे कः?

**IV. अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।**

" रचनात्मक-कार्यम् "

**IX.चित्रं दृष्ट्वा मञ्जूषायां दत्तानां शब्दानां शब्दानां सहायतया त्रीणि वाक्यानि लिखत।**



मञ्जूषा

विद्यालयस्य, छात्राः, गणवेषम्, परीक्षाम्, वाहनानि, काष्ठपट्टिका, परीक्षां, हस्ते, जनाः, प्रसन्नाः, आगच्छन्ति

**X.संस्कृते अनुवादं कुरुत।**

**1 )We should help poor people.**

**2) Farmers should get more money.**

**3)The dance of a peacocks is very beautiful.**

**4) We should protect  the nature.**

**5) People go for a walk in the morning.**

**XI. पत्रलेखनम्**

18. मित्रं प्रति स्वविद्यालयस्य वार्षिकोत्सवं वर्णयन् लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा लिखत– [CBSE 2014]

परीक्षाभवनम्

दिनांकः ..........................

(i) .......................... किंशुक!

सप्रेम नमस्कारः।

गते दिने अस्माकं विद्यालये (ii) .......................... आसीत्। तस्य (iii) .......................... तव प्रसन्नतायै लिखामि। तस्मिन् (iv) .......................... विद्यालयः वधूरिव (v) ..........................। प्रथमम् अध्यक्षमहोदयस्य सुमधुरध्वनिना (vi) .......................... अभवत्। तस्मिन् मण्डपे (vii) .......................... बालैः (viii) .......................... गीता। तदा शारीरिककार्यक्रमः अतीव प्रभावी आसीत्। सांस्कृतिक-कार्यक्रमः अपि अतीव प्रेरणादयी आसीत्। तदनन्तरं प्राचार्येण विद्यालयविवरणं (ix) ..........................। योग्यछात्रेभ्यः (x) .......................... वितरितानि। अध्यक्षमहोदयेन पञ्चसहस्रमितं धनं दानरूपेण दत्तम्। सर्वं सुसम्पन्नं जातम्।

सस्नेहं भवन्मित्रम्

राकेशः।

मञ्जूषा

| |
|---|
| स्वागतम्, भूषितः, दिने, प्रियमित्र, विवरणम्, वार्षिकोत्सवः, पारितोषिकाणि, प्रस्तुतम्, स्वागतगीतिका, प्राप्ते |

" पठितावबोधनम् "

**XII.अधोदत्तं अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

**XIII.श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

**पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न**
**खादन्ति फलानि वृक्षाः।**
**नादन्ति सस्यं खलु वारिवाहाः**
**परोपकारार्थं सतां विभूतयः॥**

**प्रश्नाः**

**अ) एकपदेन उत्तरत।**
**1)नद्यः स्वयमेव किं न पिबन्ति ?**
**2)वृक्षाः कानि न खादन्ति ?**

**आ)पूर्णवाक्येन उत्तरं लिखत।**

**1)सतां विभूतयः किमर्थं भवति ?**

**इ) भाषिक-कार्यम् ।**

**1)' जलम् ' इत्यस्य पर्यायपदं श्लोकात् चित्वा लिखत।**

**2)' वारिवाहाः ' इति कर्तृपदस्य क्रियापदं किम् ?**

**XIV.श्लोकं पठित्वा अन्वयं पूर्णरूपेण लिखत।**

**XV.कथाक्रमानुसारं एतानि वाक्यानि पुनः लिखत।**

**1)तौ विलापम् अकुरुताम् ।**

**2) एकः कृष्णसर्पः बिलात् बहिः आगच्छत्।**

**3)त्वया कदापि अपरीक्ष्य कर्म न कर्तव्यम् ।**

**4त्वया अविचार्य एतत् कथं कृतम् ?**

**5)पुत्रोऽत्र छायायां सुप्तः ।**

6)ब्राह्मणः भिक्षार्थं बहिरगच्छत् ।

---